International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 269-271
© 2026 IJMH
www.themultijournal.com
Received: 23-03-2026
Accepted: 13-04-2026
Publish : 14-04-2026

**मेघा जैनः**
शोधच्छात्रा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
लखनऊपरिसरः, लखनऊ

**Correspondence:**
**मेघा जैनः**
शोधच्छात्रा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
लखनऊपरिसरः, लखनऊ

# भारतीयप्रतिमाविज्ञाने 'विश्व-पद्म' इत्यस्य स्वरूपम्

**मेघा जैनः**

**शोधसार:**
प्रस्तुतं शोधपत्रं भारतीयप्रतिमाविज्ञाने विश्व-पद्मम् इत्यस्य दार्शनिक-कलात्मकावधारणयोः विश्लेषणं करोति। भारतीयमनीषायां पद्मं केवलमेकं वानस्पतिकं प्रतीकं नास्ति अपितु सृष्टि-ऐश्वर्य-मोक्षाणां सार्वभौमिकं प्रतीकमस्ति। शोधं महानिर्वाणतन्त्र-विष्णुधर्मोत्तरपुराणयोः शास्त्रीयप्रमाणानामालोके पद्मस्य प्रतीतात्मकाङ्गानां मूल-वृन्त-पुष्प-फलानां व्याख्या कृता अस्ति। विशिष्टतया भरहुतशिल्पे अथ सांची शिल्पे च कमलस्य विविधांकनानां माध्यमेन अस्य अधिष्ठानस्य ब्रह्माण्डीयाधारस्य पुष्टिः कृता वर्तते। निष्कर्षतः विश्वपद्मं भारतीय कलायाः आधारशिला अस्ति यत् भौतिकशिल्पाध्यात्मिकचेतनानां मध्ये तादात्म्यं संस्थापयति।

**मुख्य शब्द :** प्रतिमाविज्ञानम्, विश्व-पद्मम्, भरहुत-सांची, महानिर्वाणतन्त्रम्, प्रतीक-विधानम्, अधिष्ठानम्।

भारतीयकलायाः प्रतिमाविज्ञानस्य च सुदीर्घेतिहासे पद्मं कमलं केवलम् एकं पुष्पमात्रं नास्ति अपितु एकस्य समग्रदर्शनस्य रूपे प्रतिष्ठितमस्ति। भारतीयमनीषा प्रकृतेः एतदुपादानं सृष्टेरुत्पत्तेः, व्यापकतायाः, मोक्षस्य च आधारभूतं केन्द्रं मन्यते। प्रतिमाशास्त्रीयविमर्शे एतत् विश्वपद्मम् इति संज्ञया विभूषितं यत् जडचेतनयोर्मध्ये एकस्य सेतोः कार्यं करोति। कला-विवेचनस्य आधुनिकपरम्परायां यत्र वनस्पतिशास्त्रम् एतत्पादपं मन्यते तत्रैव भारतीयप्रतीकविधाने प्रो. एफ. डी. के. बाश सदृशो विद्वान् एतत् पूर्णवृक्षत्वेन स्वीकरोति। प्रस्तुतशोधपत्रे विश्वपद्मम् इत्यस्याः एव दार्शनिक-कलात्मकावधारणायाः विश्लेषणं करोति। अष्टदलकमलस्य लोकप्रियता व्यापिका भवति स्म। सूर्यपूजार्थं द्वादशारपद्मस्य भूमौ आलेखनं भवति स्म –

> **उपलिप्य शुचौ देशे सूर्यं तत्र समर्चयेत्।**
> **संलिखेत्तत्र पदं तु द्वादशारसकर्णिकाम्।।**[1]

### विश्वपद्मम् इत्यस्य दार्शनिक-शास्त्रीयाधारश्च

भारतीयप्रतिमाविज्ञानस्य मूलं वेदेषु तन्त्रग्रन्थेषु च सन्निहितम् अस्ति। ऋग्वेदे ब्रह्माण्डीयोत्पत्तिसन्दर्भे एवमुक्तमस्ति यत् –

> **अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः।**[2]

अर्थात् तस्य अजन्मनः नाभौ तदेकं पद्मम् अर्पितमस्ति यस्मिन् समस्तभुवनं संस्थितमस्ति। एतदेव ब्रह्माण्डीयपद्मं पुष्करं कलायां विश्वाधिष्ठानरूपे प्रकटितम्। महानिर्वाणतन्त्रानुसारेण पद्मस्य प्रतीकविधानं सृष्टेः संरचनायाः सूक्ष्मं मानचित्रमस्ति। ग्रन्थानुसारेण –

- कमलस्य मूलभागः तस्य अज्ञेयब्रह्मणः प्रतीकोऽस्ति यः सृष्टेः कारणत्वेन विराजते।
- पुष्पवृन्तः मायायाः अथवा अस्य अदृश्यमानजगत्प्रपञ्चस्य अवास्तविकतायाः सूचको वर्तते।
- पुष्पं स्वयं विश्वस्य प्रत्यक्षस्वरूपम् उद्घाटयति।
- फलं मोक्षस्य प्रतीकमस्ति।

एतदेव कारणमस्ति यत् प्रतिमाविज्ञाने यदा कमपि देवं पद्मपीठासीनं दर्शयति तदा तदेव वास्तविकतायाम् अस्मिन् चराचरजगति तस्य सत्तां उद्घोषयति।

**विश्वपद्मम् इत्यस्य सार्वभौमस्वरूपम्**

प्रसिद्धः कलाविद् ई. बी. हैवेलः भारतीयकलागतपद्मं प्रतीकविधाने विस्तरेण विचारं कुर्वन् एतत् सर्वाधिकप्रारम्भिकं सार्वभौमवनस्पतिप्रतीकं मन्यते। तेनानुसारेण पद्मं न केवलं एकं सौरप्रतीकमस्ति अपितु एतदेकं भौगोलिकं पर्वतीयप्रतीकम् अपि अस्ति। हैवेलः भरहुतशिल्पे सांचीशिल्पे च विश्वपद्मम् इत्यस्य प्रतीकात्मककल्पनायाः प्रभावं निरूपयति। एतेषां स्तूपस्तम्भनामुपरि भागेषु या विशालता दर्शिता अस्ति सा एतत् पुष्टयति यत् कमलं प्रकृतौ व्याप्ताध्यात्मिकप्रकियया सह अभिन्नतया जुष्टं कृतम् आसीत्।

**भरहुत-सांचीशिल्पयोः प्रतिमाशास्त्रीयांकनम्**

प्राग-मौर्ययुगीनकालतः शुङ्ग-सातवाहनकालं यावत् पद्मप्रतीकस्य वैविध्यं वर्द्धितं जातम्। भरहुतसांचीकलायां पद्मस्य अंकनं १०तः२४ दलपर्यन्तं मिलति।

- **सांचीकलायाः मङ्गलमालाः** - सांचीकलायाः तोरणद्वारेषु वैदिकस्तम्भेषु च पद्मसरोवराणाम् अंकनं मिलति, यत् माङ्गलिकतायाः ऐश्वर्यस्य च बोधं कारयति।
- **अधिष्ठानस्य रूपे** - प्रतिमाशास्त्रीयदृष्ट्या अत्र पद्मम् अधिष्ठानरूपे प्रयुक्तमस्ति। कुमारस्वामी- अनुसारेण प्रारम्भे कमलं जलस्य प्रतीकमासीत् किन्तु कालान्तरे शतपथब्राह्मणस्य प्रमाणाधारेण एतत् पृथिव्याः प्रतीकमपि मन्यते।

**पद्मम् : आसनम् आयुधं निधिश्च**

प्रतिमाविज्ञाने पद्मस्य भूमिका अतीवमहत्वाधायिका अस्ति। गुप्तकालं यावत् एतत् केवलं सज्जतासामग्रीरूपेण न अपितु देवतानामायुधम् आसनमपि सञ्जातम्।

- **मालासु पद्मं काम्याराधनं सौन्दर्यविधानञ्च** - वैदिककालीनयज्ञात् पौराणिकानुष्ठानं यावत् पद्मपुष्पमालानां प्रयोगः काम्याराधने अनिवार्यतया स्थितमासीत्। मथुराकलाशैल्याः वेदिकास्तम्भेषु अथ सूचीषु उत्कीर्णफुल्लातिरिक्तं सहस्रदलयुक्तकमलमालानां प्रमाणं स्तूपपूजनसन्दर्भे मिलति। गुप्तकलायां कमलानामुत्कृष्टमालार्थं किञ्जल्किनीमालाशब्दस्य प्रयोगो दृश्यते। उदयगिरेः वराहमूर्त्तेः माल्यविधानस्य सम्बन्धः ध्यानविधिना अस्ति एतदुद्धरणं स्पष्टयति यत् पद्ममाला केवलं शृङ्गारस्य न अपितु दैवीयशक्तीनां तेजसः कलात्मकरूपान्तरणमस्ति। कुषाणयुगीनमूर्त्तिषु अपि वनमालान्तर्गते पद्मकदम्बपुष्पयोः संयोजनं सौन्दर्यविधानस्य सूत्रं पातयति, यत्सर्वर्तुकुसुमोज्वला मालेत्युच्यते –

  **व्योमस्थशक्तिरपि सूर्यसहस्रमाला**
  **नीलाम्बुजद्युतिमती मनसा विचिन्त्या**
  **मालां चतुर्गतिमयीं वपुषा दधाना**
  **वायुस्थशक्तिरपि धूमतनुर्विचिन्त्या**
  **कालानलाख्य तरुणार्क सहस्रमाला...।**[3]

- **आयुधरूपे** - अहिर्बुध्न्यसंहितायां केशवादि १२ मूर्तिभेदानाम् आयुधविन्यासे पद्मस्य निर्धारणम् एकं नवं प्रतीकवादम् उत्पादयति।
- **निधिरूपे** - मार्कण्डेयपुराणानुसारेण **पद्मिनीविद्या** इत्यस्याः अधिष्ठातृदेव्याः लक्ष्म्याः सम्बन्धः नवप्रकारकैः निधिभिः अस्ति, यस्मिन् पद्मनिधिः अथ च महापद्मनिधिः इति द्वयं सत्वगुणिनां कोटौ मन्यते। यथोक्तं वर्तते –

  **पट्टचीणमहानेत्रदुकूलवरकम्बलैः।**
  **वस्त्रैर्विचित्रवर्णाढ्यैः पूर्णपद्मनिभिः सदा।।**[4]

अर्थात् पद्मनिधिः सदैव बहुमूल्यवस्त्रैः सुन्दरवेश-भूषाभिः संसम्बन्धितः ऐश्वर्यप्रतीकोऽस्ति।

**कलात्मकसंक्रमणं प्रतीकवादश्च**

**विष्णुधर्मोत्तरपुराणे**[5] पद्मोपरि ब्रह्मा-हरि-रुद्र-श्री-शक-सूर्य-चन्द्रमसां स्वतन्त्रमूर्तिप्रतिष्ठायाः विधानं मिलति। अत्र पद्मस्य अर्थः प्रत्येकं देवतायाः कृते भिन्नः अस्ति -

1. लक्ष्म्याः इन्द्रस्य च कृते एतत् वैभवस्य प्रतीकमस्ति।
2. पार्वत्याः कृते एतत् वैराग्यस्य प्रतीकमस्ति।
3. कुबेरस्य कृते एतत् कोषस्य प्रतीकमस्ति।
4. सूर्यप्रतिमायाः अभिज्ञानस्य एकमात्रं साधनमेव पद्मप्रतीकम् अस्ति।

कलायां हनीसकल-अभिप्रायस्य सम्बन्धोऽपि विद्वांसः जम्बूद्वीपपरम्परायाः अनेनैव पद्मप्रतीकेन साकं योजयन्ति। अजन्तायाः गुहसंख्याद्वितीये तृतीये च पद्मपाणेः अंकनम् अस्या एव आध्यात्मिकयात्रायाः कलात्मकचरमोत्कर्षमस्ति।

**पद्मनिधिः महापद्मनिधिश्च ऐश्वर्यस्य प्रतिमाशास्त्रीयस्वरुपम् –**

मार्कण्डेयपुराणानुसारेण अथ गुप्तकालीनमान्यतानुसारेण पद्मस्य सम्बन्धः केवलं देवस्वरूपादेव न अपितु निधिरूपे मानवजीवनस्य भोगेभ्यः अस्ति। पद्मं शंखञ्च कुबेरनिधीनामधिष्ठातृरूपेण मन्यते। जैनपुराणे हरिवंशे च निधीनां नामानि मार्कण्डेयपुराणाद् भिन्नानि सन्ति। यत्र पद्मनिधिं बहुमूल्यवस्त्राणामथ सुन्दरवेशभूषाणां स्वामी कथ्यते प्रतिमाविज्ञानस्य दृष्टौ महापद्मनिधिः रत्नदायिनीति नाम्ना ख्यातिलब्धः आसीत्। कुमारस्वामिमतानुसारेण कुबेरस्यायं पद्मनिधिः भरहुत-सांचीकलायाः रत्नमञ्जरिकेति माध्यमेन अर्थस्य प्रत्यक्षस्रोतरूपे प्रस्तुतोऽस्ति। एतत्तथ्यमिदं पुष्टीकरोति यत् भारतीयकलायां कमलं केवलं वैराग्यस्य न अपितु सात्विकैश्वर्यस्य समृद्धेश्च प्रतीकमस्ति।

**कलायां पद्मस्य बहुमुखरूपरेखा मुद्रात: भित्तिचित्रं यावत् –**

प्राचीनभारतीयकलायां पद्मस्य व्याप्ति: वैष्णव-बौद्ध-जैनधर्माणां समन्वयस्योत्कृष्टमुदाहरणमस्ति। भीतरीग्रामादवाप्तस्य अनन्तशा-यिन: विष्णो: अंकने नाभिकमले स्थितब्रह्मणस्य चित्रणमत्यन्तं महत्त्वपूर्णमस्ति। सूर्यपूजाया: कृते भूमौ द्वादशपद्ममस्य आलेखनस्य विधानं शास्त्रसम्मतमस्ति। एतत् प्रतिमाशास्त्रीयविधानं सूर्यस्य द्वादशकलानामथ ब्रह्माण्डीय चक्रस्य प्रतिनिधित्वं वहति। एत-दतिरिच्य मुद्राक्षेत्रे चन्द्रगुप्तद्वितीयस्य मुद्रासु कमलधृताया: सिंहवाहिनीदेव्या: अथ कमलासनस्थाया: देव्या: अंकनं राजसत्तां दैवीयाधिष्ठानं प्रदानाय प्रतीकरूपे प्रदत्तमस्ति। बाघगुहाया: भित्तिचित्रेषु पद्मपाणे: रुपांकनं अथ तृतीयगुहायां पद्मोपरि उत्थितस्य बुद्धस्य चित्रणम् अस्य प्रतीकस्य सर्वव्यापकतां सिध्यति। रायपसेणीयसुत्तानुसारेण पद्म-वर-वेदिकानां कलात्मकस्वरूपं महा-भाष्यमिवास्ति यस्मिन् उत्पल-पद्म-कुमुद-नलिन-पुण्डरीकादिसदृश-भेदानां चित्रणस्य परम्परा सुदृढा अस्ति।

**निष्कर्ष:**

उपरोक्तविवेचनेन एतत् स्पष्टीभवति यत् भारतीयप्रतिमाविज्ञाने विश्वपद्मम् इत्यस्य अवधारणा केवलं सौन्दर्यबोधं यावत् सीमितं नास्ति अपितु एतदेकं गहनदार्शनिकसंरचनम् अस्ति। भरहुतशिल्पस्य सांचीशिल्पस्य च शिल्पिन: यत् विश्वपद्मं पाषाणोपरि अंकितवन्त: तद्वास्तविकरूपेण सृष्टे: तन्मूलसत्यम् अभिव्यञ्जितुं प्रयास: आसीत् यत्र जडजगत: नि:सृत्य चेतनां प्रकाशं च प्रति उन्मुखं करोति। महानिर्वाणतन्त्रात् विष्णुधर्मोत्तरपुराणं यावत् शास्त्रीय परम्पराया: अथ सांचीज-भरहुतशिल्पस्य च कलात्मकपरम्पराया: समन्वयनमेव भारतीयप्रतिमाविज्ञानस्य अद्वितीयोपलब्धिरस्ति।

अत: एतत्स्पष्टमस्ति यत् भारतीयप्रतिमाविज्ञाने विश्वपद्मं केवलमे-कमलंकरणमात्रं नास्ति अपितु चराचरजगत: आध्यात्मिकसत्ताया: मूर्त्तस्वरूपमस्ति। भरहुत-सांचीपरम्पराया: पाषाणान्नीत्वा गुप्तका-लीनमुद्रां यावत् अस्या: व्याप्ति: सिध्यति यत् कमलस्य प्रतीकविधानं भारतीयमनीषाया: तदद्वैतभावं दर्शयति यत्र भौतिकशिल्प: दार्शनिकचिन्तनश्च परस्परं एकाकारं भवति। महानिर्वाणतन्त्रस्य दार्शनिकविश्लेषणानां विभिन्नसंहितानां च प्रतिमालक्षणानां समन्वय: एतत्प्रमाणीकरोति यत् पद्मं भारतीयसंस्कृते: तादृशी आधारशिला अस्ति, या पंकरूपसांसारिकतात: उपरि गत्वा ब्रह्मज्ञानस्य निर्मलप्रकाशं प्रति अग्रे सर्तुं प्रेरयति। एतदेव अस्य प्रतीकस्य सार्वभौमिकी प्रासङ्गिकता अथ कालजयी महत्ता च विद्यते।

**सन्दर्भग्रन्थानुक्रमणिका**


1. अहिर्बुध्न्य संहिता, सं. एम. डी. रामानुजाचार्य, 1966.
2. ऋग्वेद, अनु. मैक्समूलर (आक्सफार्ड 1891), सं.- श्रीपद शर्मा, बम्बई, 1966.
3. भारतीय कला, वासुदेव शरण अग्रवाल, पृथ्वी प्रकाशन, वाराणसी, 1966.
4. भारतीय कला का इतिहास, आनंद कुमारस्वामी, द थियोसोफिकल पब्लिशिंग हाउस, 1956.
5. वामन पुराण, गीता प्रेस, गोरखपुर.
6. विष्णुधर्मोत्तर पुराण (तृतीय खण्ड), भाष्य.- श्री कपिलदेव नारायण, चौखम्बा संस्कृत सीरीज आफिज, वाराणसी, 2015.
7. सुप्रतीका, प्राचीन भारतीय कला में प्रतीक, प्रभाशंकर पाण्डेय, शारदा पब्लिशिंग् हाउस, दिल्ली, 2001.
8. हरिवंश पुराण, आचार्य जिनसेन सूरि, नानिक्यचन्द्र दिगम्बर जैन ग्रन्थमाला, बम्बई.


**सन्दर्भ**

[1.] वामन पुराण, 52.5

[2.] ऋग्वेद, 10.82.06

[3.] अहिर्बुध्न्य, 24. 21-23

[4.] आचार्य जिनसेन, हरिवंश, 11.120

[5.] विष्णुधर्मोत्तरपुराण, अध्याय-45